कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

203 — 162

॥श्री॥ अथगोवर्धनसप्तशतीप्रा॥
॥रभ्यते॥ श्रीराधाकृष्णःप्रसन्नो॥

K K S U LIBRARY
RAMTEK
441 106
M-904
Dist Nagpur

Checked 2012

Accession No:- 2142
Title:- आर्यासप्तशती
Author:- गोवर्धन
Date:- शके 1772
Subject:- काव्य

part - I

①

पत्रे

Total 468

पत्रे - 180 200.

३ ॥श्रीगणेशायनमः॥ श्रीमन्महागणाधिपतयेनमः॥ श्रीललितांबिकायैपरदेवतायैनमः॥ अथगो
वर्धनाचार्यसप्तशतीसटीकाप्रारभ्यते॥ ॥सर्वेसाधुजनासदायनत्द्दासस्संप्रदायादलंयु
तज्ज्ञानाकरणादगौतममनान्यालोच्यतत्त्वार्थदाल् वेदांतानूपरिशीलयंतिहरस्सिस्वानंदकं
दाकंरवंदेतंजगदीश्वरंदयितयास्वानंदमालिंगितं १ यत्पादांबुजमब्जभूप्रभृतयोदेवाः
सदेवांतरध्यायंतिग्लपयंतिदुःखनिवहंलीलामनुष्याकृतिं नीलेंदीवरमित्रनेत्रमतसीपु
ष्पावभासंलसत्श्रीरामंकलयामिचेतसिचिरंचेतन्यमात्रात्मकं २ पंचात्राहृणीभेदैरपरि
मितनैररर्थजातेश्चयुक्तानानास्त्रकारस्यागणितगुणिगणासाधुवृत्तैरुपेता वाक्सृष्टीयत्प्रसादात्स
सरतिरसनोपांतदेशानिमेषात्स्नंसचित्तेनुरक्तेवसतुममसुखंभारतीसारसाद्या ३ गोवर्धनो
क्तिसुखदाननिदानमेनंव्यंग्यार्थदीपनमनल्पचमत्कृतीनां भूयादनंतविबुधेनविधीयमानं
प्रीत्यैसदासकलपंडितमंडलीनां ४ आर्यार्थग्रहणेनावदार्याएवाधिकारिणः अतीलद्द ३
श्विस्तेरेषकार्यानान्यैःकदाचन ५ गभीरार्थप्रसत्तानियनवचसामाभयज्जुषांगुणालंकारा
णांभवंतिघटनासत्वरतरं अतोहेतोश्चेताविपुलमतिनातत्रविषयेनियोज्यंपयेनांतःसतत्र

②

सुरतसंबाधवसति ६ संत्यज्यदोषंगुणएवदृष्टिर्विधीयतामित्यफलंवचोमे विहायनीरंसरू
लोपिहंसःपयःप्रगृह्यात्सुपदेशातःकिं ७ विशिष्टशिष्टैष्टकर्तव्यतापरिप्राप्तमंगलमनुष्ठ
गतोव्याख्यातृश्रोतृमंगलायनिबध्नाति पाणिग्रहइति भूतिभूषितंभस्मनाअलंकृतं भस्म
नोभूषणत्वंमनोभवीयत्वेनप्रस्तुभूत्याऐश्वर्येणेतिव्याख्यानंतदैशमित्यनेनगतार्थत्वात् प्रकृ
तानुपयुक्तत्वाच्चोपेक्ष्यं पाणिग्रहे अर्थाद्वत्सलतानुरक्तकामिन्याःपुलकितंसंजातरोमांचं सात्वि

॥श्रीगणेशायनमः॥ पाणिग्रहे पुलकितंवपुरैशंभूतिभूषितं
जयति अंकुरितइवमनोभूर्यस्मिन्भस्मावशेषोपि १

कभावोदयादितिभावः ऐशमीशसंबंधि चैत्रादिपदवदीशपदस्यकर्तृणोणत्वादिमत्तशरीरो
पहितात्मनिशक्तोगोरवाल्लाघवात्ताहशरएवशक्त्यान्नित्यज्ञानादिमहात्मनिलक्षणा य
द्वाईशऐश्वर्यइतिधातोरचिनिष्पन्नेशपदेनशक्त्याजगत्कर्तृत्वादिऐश्वर्यंवत्वंबोध्यते तत्सं
बंधस्यशरीरांतरेसत्वेपिभूतिभूषणविशेषणमहिम्नाशंकरीयत्वमेवायातिवपुषि एवंचम

२ नोभूभस्मसंबंधः सर्वोत्कर्षशालित्वंयोग्यत्वंव्यज्यतेवपुः जयतीति यद्वा भूतिभूषितमित्यनेनभूष
णसामान्याभावप्रतिपादनेपिसर्वोत्कर्षशालित्वेदेवीपाणिग्रहणजन्यपुलकवत्ताहेतुजयती
त्यनेनईशस्यसर्वोत्कर्षशालित्वप्रतिपादनेनसर्वांतर्गतेस्वस्मिन्नपकर्षप्रतिपादनान्नतिरावेद्यते
भस्मावशेषोपि एवंचांकुरितभावानईशेर्पितत्वेननदेवीपाणौसुधारूपत्वमावेद्यते मनो
भूः एवंचमनसोबीजरूपत्वात्प्रतिपादनेननतस्यांतर्गतत्वाद्वपुष्यंकुरवत्तायोग्यत्वंव्यज्यतोवि
शिष्यानाकुरुणीयरूपेपिभवनयोग्यत्वेनवपुषिविशेषभवनयोग्यत्वंवा यस्मिन्वपुषि अंकुरि
तइवसंजातांकुरइवेतिभस्मसंगिरोमांचे अंकुरोत्प्रेक्षा एवंचयथांकुरसंजातमहत्तरतरुः किस
लयकुसुमफलादिनाव्यंजनोपकारस्तथैवांकुरभाविकुमारफलादिनातारकादिवधेनसक
लजनोपकारोभवितेतिध्वन्यते अत्रांकुरितत्वंपाणिस्पर्शस्यामृतरूपत्वेनवस्तुनावस्तुव्यज्य
ते १ मावमेति इदंइदमित्यनेनापलापानर्हत्वमथवाजगद्विनाशानविदितविभवमितिव्य २
ज्यते विषमावमकिंतुसंवृणुइतिसातंकसातंकत्वंचसकलजगद्विनाशेपुनस्तद्विधानदुष्करत्व
निर्णयेनएवभ्रमयोग्यत्वरहस्यलज्जावत्त्वंध्वन्यते प्रातः उक्तः प्रातरित्यनेनकज्जलस्फुट

दर्शनयोग्यत्वंव्यज्यते अतःसलज्जःनत्वपत्रपावान्पितामहेनकज्जलत्वेनाज्ञानात् कज्जल
मलिनाधरः नेत्रचुंबनादितिभावःशंभुः एवंचकामिनीप्रीत्यतिशयप्राप्तित्वंद्योत्यते जयति
पितामहसंत्रासजनकगरलगिलनेनब्रम्हणःप्रार्थनयासुभगकामिनीरतचिन्हवत्त्वेनवायध
पिमावमीरित्येववक्तुमुपक्रांतथापिप्रतिषेधार्थीयमानाद्धः यद्वासमर्थस्त्रमागधत्वं वृकेभ्यो

मावमसंवृणुविषमिदमितिसालंकंपितामहेनोक्तः प्रातर्जय
तिसलज्जःकज्जलमलिनाधरःशंभुः २ जयतिप्रियापदांते
गरलग्रैवेयकःस्मराराातिः विषमगिरीशेखरविशालनिवकारणं
गलबद्धकरवालः ३

भयंदेवदत्तस्येतिभाष्यप्रयोगात् माडिलुडित्यनित्यं २
जयतीति गरलंग्रैवेयकंकंठभूषायस्यस्मरारातिःप्रियापदांतेजयति एवंचकुपितकामिनी
प्रसादनकर्तव्यतायापरमपुरुषार्थत्वंव्यज्यते गरलग्रैवेयकइत्यनेनजीवनायोग्यत्वं स्मरा
रातिरित्यनेनस्मरबाधावत्त्वेनक्वचिदपिसुखावस्थानायोग्यत्वंध्वन्यते एवंचैतादृशस्यापिस

(5)

२ वोत्कर्षशालित्वं प्रियापदांसेवस्थितिरेवहेतुरतोऽप्रियापदांतावस्थितेनान्यदधिकलरत्वमस्तीति द्योत्यते यद्यागरलत्वेग्रैवेयकइत्यनेनजीवननिस्पृहत्वं एवंचैतादृशस्यापिकुपितकामिनीप्रसादनलंपटत्वं किमुतान्येषामितिध्वन्यते गलबद्धस्रजः विषमविशिखे एवंचशरणार्हत्वंव्यज्यते शरणंविशन्निवगच्छन्निवविषमविशिखइत्युत्प्रेक्षयाविषमविशिखस्यापिप्रियापदसान्निध्येनाधिकत्वंकिंपुनरन्यस्येतिद्योत्यते एवस्त्रीणांचरणेमदनइतिकामतंत्रे अन्योऽपिशम्भुगलबद्धानुरणेण

जयतिललाटकटाक्षः शशिमौलेः पक्ष्मलः प्रियाप्रणतौ
धनुषिस्मरेणनिहितः सकंटकः केतकेषुरिव ४

छतीतिश्लोकिकः ३ जयतीति शशिमौलेः एवंच सकलंकस्याप्येतादृशोदरसंपादनेनसंतापातिभीरुत्वंध्वनतेइतितेनचकुपितकामिनीप्रसादनेऽवश्यकर्तव्यत्वं पक्ष्मलः प्रशस्तपक्षयान् २ पक्ष्मलदलंकेतकोत्प्रेक्षादार्ढ्यायललाटकटाक्षः एवंचभ्रूमध्यसंबंधित्वंद्योत्यते तेनचधनुर्निहितबाणोत्प्रेक्षादार्ढ्यं प्रियाप्रणतौप्रियाविषयकेहरप्रणतौसत्यांतपतिचाटुवचनाद्यसाध्यमा

नापनोदनकार्यकारित्वेनेतिभावः स्मरेणकंटकः एवंचनिःसारणानर्हत्वंध्वन्यते धनुषिनिहितःन तुशीघ्रंपरित्यक्तः एवंचमुष्टिबंधनदार्ढ्येनभेदनविशेषकारित्वं तेनचमानलक्ष्यभंगेतिशीघ्रविधेयत्वंव्यज्यते केनकेषुरिवस्मरस्यपुष्पसायकत्वादितिभावः एवंचमानापनोदनंव्यज्यते केचित्तुप्रियाकर्तृकसेवाभणतोसमान्मथविकारल्ललाटकटाक्षोजयतीत्यपिवदंति ४ जयतीति

जयतिजटाकिंजल्कंगंगामधुवलयबीजमयं गलगरलपंकसंभव
मंभोरुहमाननंशंभोः ५ संध्यासलिलांजलिमपिकंकणफणिपी
यमानमविजानन् गौरीमुखार्पितमना।विजयाहसितःशिवोजय
ति ६

जटाःकिंजल्कानियत्रेतिरूपकं पूर्वमग्रेपि ५ संध्येति कंकणरूपफणिपीयमानमपिकंकणरूपपदेनप्रात्यक्षिकत्वंध्वनते फणिपदेनभूषणयोग्यत्वं तेनचसर्वदाविलोकनयोग्यत्वंध्वनते पीयमानइत्यनेनज्ञानयोग्यत्वंध्वन्यते संध्यासलिलांजलिंराजदंतादिवदंजलेःसलिलमितिसमासः संध्यापदेनतदेकचित्तावश्यकत्वंव्यज्यते अंजलिपदेनतदेकाचि

४ तावश्यकत्वंव्यज्यते अंजलिपदेनभूयस्त्वंद्योत्यते तेनचतस्यानल्पविलंबसाध्यत्वेनावश्यंयज्ञत्वम
विज्ञानन् अत्रहेतुमाह गौरीमुखार्पितमनाइतिबिंबितगौरीमुखसमर्पितचित्तइत्यर्थः गौरीत्यनेन
मनःसंलग्नतायोग्यत्वंमुखेध्वन्यते अर्पितपदेनग्रहणायोग्यत्वंव्यज्यते एवंचेतादृशविषयज्ञाना
भावेनासंततात्राक्तिर्गौर्यांगिरीशस्यरतिर्व्यज्यते अतएवविजयागौरीसखीतयाहसितःशिवोजयति
एतादृशपरिहासस्याप्युत्कर्षाधायकत्वादितिभावः ६ प्रतीति सलिलांजलिर्जयति एवंचांजलि

प्रतिबिंबितगौरीमुखविलोकनोत्कंपशिथिलकरगलितः स्वेद
भरपूर्यमाणःशंभोःसलिलांजलिर्जयति ७ प्रणयकुपितप्रिया
पदलाक्षासंध्यानुबंधमधुरेंदुः तद्वलयकंकणनिकषग्रावग्रीवःशि
वोजयति ८

जलप्रतिबिंबितगौरीवदनविलोकनसंजातकंपरूपसात्विकभावविश्लेषकरगलितत्वेपिस्वेद ४
रूपसात्विकभावरभराकस्मिकपूरणात्सर्वोत्कर्षेणशालित्वमितिभावः ७ प्रणयइति प्रणयेनवा
स्तवंकुपितायाप्रिया एवंचचरणप्रणामयोग्यत्वंध्वन्यते तस्याश्चरणलाक्षारूपसंध्यासंबंधसुंदरश्च

४

द्वापस्यतस्याःपार्वत्याःकंकणकनकस्यनिकषोपलरूपाग्रीवायस्य एवंचमानापनोदनात्कंठग्रहपु
रःसरमालिंगनादिध्वन्यते एतादृशःशिवोजयतिप्रियाप्रसादादितिभावः यद्वास्वकार्योद्देशेपि
नप्रियाप्रणामेनसंध्याचंद्रमसोरपिसंगसंपादनायासेनपरोपकारित्वलाभादितिभावः ८ श्री
पूर्णेति गौर्याश्चरणस्यांगुलमध्यगुल्फेषु अत्रमध्यस्यांगत्वाभावान्नैकवद्भावः मध्यमपदलो

पूर्णेनखेंदुद्विगुणितमंजीराप्रेमशृंखलाजयति हरस्यशिरे
खागौरीचरणांगुलिमध्यगुल्फेषु ९

पीसमासोवापूर्णः नखेंदुर्यथापूर्णेनखस्यार्धचंद्रत्वादितिभावः द्विगुणीकृतंमंजीरंययापूर्वंमंजी
रस्यैकगुणत्वादितिभावः प्रेम्णःशृंखलायया एवंचपूर्णसुवर्णाभरणांतरकृत्येपिप्रेमस्थिसं
पादकाभिनवभूषणत्वादितिभावः एवंचयथायथामानापनोदंनतथातथाशिरश्चरणसंयोगो
धिकतरःसंवृत्तइतिभावः एवंचसहसामानिनीचरणेमस्तकस्थापनेपिभीतिरित्यावेद्यते इत्या
हृत्वाहरचंद्रलेखाजयति युगपदनेककार्यसंपादनादितिभावः ९ श्रीकरइति पुंडरीकनयन

स्यविस्नोः श्रीकरपिहितं तरतीतिवसनविहीनतयालज्जावशादितिभावः प्रियःकरेणनतुप्रिया आनंदाविर्भावादितिभावः अतएवचक्रेगतीतिकरइतिकरपदमन्वर्थं नतोनाभिरंध्रेणसुषिर पद्मन्यावलोकनीयत्वंव्यनक्ति जघनंईक्षितुमागतमिवेत्युत्प्रेक्षा एवंचलक्ष्मीजघनदर्शनला लसत्वंव्यज्यते पिधानानर्थक्यंचअब्जसादृश्यं एवंचनाभिकमलस्यांतस्यापिपिधानायोग्यत्वमा वेद्यते चक्षुष्मान्सुखयतु पिहितेपिगोलकेन्यमार्गेणागत्यजघनविलोकनकारितयेतिसुख

श्रीकरपिहितंचक्षुःसुखयतुवःपुंडरीकनयनस्य
जघनमिवेक्षितुमागतमब्जनिभंनाभिसुषिरेण १०

लंपटत्वेनसुखदानस्यसुखप्राप्तिनिदानतयान्यस्यदुःखजनकत्वंतस्येतिभावः नन्वत्रपुंडरीकनयनस्येत्यनेनकमलसादृश्यस्यसिद्धावब्जनिभमित्यस्यनतथाप्रयोजनमितिचेन्न पुंडरीकनयनइत्यत्ररूढिरेव यद्वाब्जपदस्यवक्तृतात्पर्यान्यथानुपपत्त्यारक्ताब्जेलक्षणा एवंचलक्ष्म्याःसितांभोजत्वंननेत्रज्ञानेपिरक्ताभोजत्वेनाज्ञानात्तद्रूपांगीकारेणनिभृतमार्गगमनेनचजघनदर्शनका

रितिपिनश्रीकरपिहितत्वमितिव्यज्यते अन्योप्ययंतल्पेटारूपांतरनिभृतमार्गेणचलब्ध्यात्वत्का
र्यसाधयतीतिलौकिकं केचित्तुरक्तमित्युक्तेरक्तमेवाब्जमित्युक्तेरक्ताब्जमेवकविसंप्रदायादितिव
दंति १० श्याममिति श्यामंविष्णोःश्यामत्वादितिभावःश्रीकुचकुंकुमपिंजरितं एवंचदृढालिंग
नमितिव्यज्यते ततमुरद्विषःउरः एवंचकठिणत्वमुरसिव्यज्यते तेनचश्रीकविणकुचकुंभसंघट्ट
नसहिष्णुत्वंजयतिसर्वोत्कर्षं लक्ष्मीदृढालिंगनंहेतुःदिनमुखनभइवप्रातःकालीननभसोऽख

श्यामंश्रीकुचकुंकुमपिंजरितमुरोमुरद्विषोजयति दिनमु
खनभइवकौस्तुभविभाकरेणाद्विभूषयति ११

तोनीलिमावत्वात्संध्यासंवलितत्वाच्च तथाविधोरसःसादृश्यं कौस्तुभएवविभाकरःपक्षेकौ
स्तुभवत्विभाकरःसूर्यःयत्उरःविभूषयति एवंचत्रिभुवनाधिपतेनिरीहस्यापिकौस्तुभाभर
णधारणमुरस्थस्येनकलोकयुगपत्सकालाविश्रांतिविधाननिदानतांध्वनयति एवंचविभाक
रादितिन्यायोव्यज्यतेकौस्तुभे ११ भतीति कौस्तुभअतएवप्रतिबिंबिताप्रियायाःतनुयत्रत
तमुकुरमिववक्षस्थलक्ष्मीःपुरुषायितंविपरीतरतंअभ्यस्यतितत्मधुभिधोवक्षः एवंचदार्ढ्य

मायेयेन स्वछनातिशेषोवा जयतिलक्ष्म्याः पुरुषायिताभ्यासनिदानेनेवसर्वोत्कर्षहेतुः अन्योन्या
दर्शप्रतिबिंबमवलोक्यैवान्यानवलोकनीयचेष्टाविशेषाभ्यासंकरोतीतितिलोकिकं १२ केलीति
क्रीडाचपलांगुल्यालंभितःस्पृष्टाचरणसेवाकांक्षिण्यादितिभावः नाभिर्येन अतएवयेन श्रीःप
द्मनाभस्य अनुरूपाचरणरूपपद्मनाभीतेनेतिभावः कृतासःमुरद्विषश्चरणः जयति ब्रम्हणोपि

प्रतिबिंबितप्रियातनुकौस्तुभजयतिमधुभिदोवक्षः पुरुषायित
मभ्यस्यतिलक्ष्मीयद्दर्पमुकुरमिव १२ केलिचलांगुलिलंभि
तलक्ष्मीनाभिर्मुरद्विषश्चरणः सजयतियनकृता श्रीरनुरूपाप
द्मनाभस्य १२

जसाध्यकार्यकारणादितिभावः १३ रोमावलीति मुरारेः
एवंचसामर्थ्यमभिव्यज्यते तेनव तद्दत्वेपि भृगुचरणहननसहिष्णुत्वेनक्षमागतिन्नायबलं श्रीवत्से ६
नभृगुचरणचिन्हेनातिषविलसत्तत्संबंधवानित्यर्थः अग्रभागोयस्याः एताहक्षीरोमावली उन्न
तुर्ध्वंनालंयस्य पयःयन्नाभिनलिनंतच्छायेव एवंचरोमावल्यांनालच्छायोत्प्रेक्षा श्रीवत्सेनचमि

नष्टायोत्प्रेक्षा वः उत्तापंमहत्संतापंअपहरतुकमलछायायाःसंतापापनोदकत्वादितिभावः १४
आदायेति सप्तसंख्याकानांतंत्रीणामग्निष्टोमादीनांसमाहारःसप्ततंत्री ग्रासांलक्षतिपादनपरा
मितियावत् तंत्रंप्रधानेयोगेचेतिविश्वः पक्षेतंत्रीतलाहतंत्रीतुविशेषः त्रयींविपंचीमिवआदाय
मधुरंतुरंगवदनानांगंधर्वाणांउचितंयोग्यं एवंचैतादृशगानकर्तृत्वाभावस्तेषामितिव्यज्यते गा

रोमावलीमुरारेःश्रीवत्सनिषेविताग्रभागावः उन्नालनाभिनलिनच्छाये
वोत्तापमपहरतु १४ आदायसप्ततंत्रींविततांविपंचीमिवत्रयीमायन्
मधुरंतुरंगवदनोचितंहरिर्जयतिहयमूर्धा १५ सजयतिमहावराहो
जलनिधिजठरेचिरंनिमग्नापि येनाद्रेरिवसहफणिगणैर्बलादुधृताधरा

यन्नहयमूर्धाहयग्रीवः एवंचतुरंगवदनोचितगानकर्तृत्वेसहरिर्जयति एवंचैतादृशगानस्वरूपगु
णरूपत्वादितिभावः १५ सेति येनजलनिधिजठरेउलब्धपारेख्याज्जलनिधित्वेन धरणीस्था
नस्थायोग्यत्वं चिरंमिलनेननष्टमितिनिस्सारणयोग्यत्वंव्यज्यते निमग्नापि अद्रेरिवफणिसमू

हेःबलात्कारेणसहधरणीउद्धृतासःमहावराहः एवंचैनद्दंष्ट्रायाः अतिदृढत्वंचकसाभ्यांजठरांत
र्गतत्वेनाचरूपफणिसमूहसहितधरोद्धारसामर्थ्यमुचितमितिव्यज्यते जयति अनन्यसाध्य
कार्यकारणादितिभावः १६ ब्रम्हांडेति ब्रम्हांडंकुंभंकरोतीति एवंचयथाकुंभकारस्यकुंभकर
णेनकौशलेनारलस्तथास्यब्रम्हांडकरणमितिव्यज्यते भुजगस्याकारइवाकारोयस्यतं एवंचवा
स्तथैतद्रूपंयथातथ्येननिर्णेतुमशक्यमितिव्यज्यते जनार्दनं एवंचेतद्गीतीरवनंयविधेयत्वेतिध्व

ब्रम्हांडकुंभकारंभुजगाकारंजनार्दनंनौमि स्फारयस्फ
णचक्रेधराशरावश्रियंवहति १७

न्यतेतेनचेतदद्भुतानोक्तलंघनीयतिस्फारएवधराशरावःश्रीसंपादनयोग्यत्वंद्योत्यते यस्यफणा
समूहधरा एवंचमहत्तरत्वंव्यज्यते शरावस्यस्वरूपमृद्भाजनविशेषस्यश्रियंवहति तत्तुल्याहत्वय
तइतिभावःएवंचयस्यभुजगरूपस्याग्निविशालत्वंध्वन्यते अन्यस्याकुलालस्यचक्रेशरावो

१५

भवतीमिति लोकिकं अत्र धरावाराच श्रियं च हलीलेतावेनेव फणचक्रे स्फारत्वसिद्धावुत्तमकाव्येत नस्फारदोषादानमुचितमित्याभाति १७ चंडीति प्रियेणशंकरेण शिरसाचरणस्पृशि कोपापनोदाय प्रणतिकारिणि सति शंकरमभिव्याप्य जयवतः स्मरस्य जयस्तंभस्येव चंडीजंघारूपः कांडो वंशाः जयति स्वतः सुखविशेषजनकतया लुब्धविनपराङ्मुखस्यापि तादृश्यवस्थासंपादनादि

चंडीजंघाकांडः शिरसाचरणस्पृशि प्रियेजयति शंकरपर्यंतजितो
वीरस्तंभः स्मरस्येव १८ उन्नालनाभिपंकेरुहइव येनावभाति
शंभुरपि जयति पुरुषायितायास्तदाननंशैलकन्यायाः १९

तिभावः एवं चैहिकामुष्मिकसुखापेक्षयासीमंतिनीसंगसुखे अधिकतरत्वमावेद्यते १८ उन्नालइति येन शंभुरपिनाविष्णोरवनावतारत्वेन नाभिपंकेरुहवत्तायोग्यत्वं व्यज्यते उर्ध्वनालं यन्नाभिपंकेरुहं तद्वानिव यद्वा विष्णुरिवेत्यर्थः एवं शरीरस्यनालसाम्यप्रदर्शनात्कृशांगित्वमभिव्यज्यते आभाति पुरुषायितायाः शैलकन्यायाः एवं चेतनदार्ढ्येतेन पुरुषायितसंपादनयोग्यत्वं

15

ध्वन्यते ननु आननं जयति अघटितघटनापटुत्वादितिभावः १९ अंकइतिलीनोयोगजानन
स्तंछंकयोस्तनयोः कुंभिकुंभसाम्यादितिभावः अकुलः स्वभंमांविहायैवापिवसंगोप्यबहुकालंस्त
न्यप्रपच्छतीतिधियेतिभावः यद्वानमयनपिधानक्रीडायांगजाननोंकएवलीनोनत्वन्यत्रगतइति
मन्येतिभावः आकुलपदेनशीघ्रमविचारितकार्यकर्तृत्वंव्यज्यते योवाकुलेयः तारकाचेतनत्

अंकनिलीनगजाननशंकाकुलबाहुलेयहृतवसनौ।
सस्मितहरकरकलितहिमगिरितनयास्तनौजयतः २०

नवसनौगजानननियार्थमितिभावः सस्मितः कथमपिशुभयोरप्याकस्मिकप्राकट्यमितिभावः
योहरः सतएववसनहरणादिनातत्कार्यकारित्वंध्वन्यते तेनकरकलितौकरोतीति करइत्यस्य
तस्यतत्कार्यकारित्वेऽपिहरप्रेषितत्वानाकलनेदार्ढ्यंद्योत्यते हिमगिरितनयायाः एवंचेन्नोस्यसहितक
ठिणत्वंध्वन्यते तेनचावक्षस्करकलनयोग्यत्वं अतएवहरेतिस्मरमित्यपियुक्तं स्तनौजयतः भवन
तान्येनाविष्कृतत्वेऽपि अन्यस्यसुखसंपादनादितिभावः यद्वागजाननगिरिशविवाहनयोः सफलावि

भनिवारकत्वकार्यमात्रपुरस्कारणीयत्वात्तारकवधद्वारकचित्संतोषपोषकत्वान्निदानत्वन्यवत्वा
दितिभावः यद्वास्मरविरोधिनोप्यानंदजनकत्वादितिभावः २० कंठोंचितइति आलिंगनोद्दी
पिअक्षेअर्धचंद्राकारतयाकंठलक्ष्ययोग्योपिहुंकृतिमात्रेणनतुकरतर्जनादिना पक्षेनबाणादि
नानिरस्तः एतएवयस्याःपदांतिकप्रणामार्थमितिभावःपक्षेवेगविनाशादितिभावःस्मरशरसदृ
शः अर्धचंद्रशिखत्वादितिभावः स्मरभल्लनिभइत्यनेननमानोपनोदनसमर्थत्वंद्योत्यते यद्वास्मर

कंठोंचितोपिहुंकृतिमात्रनिरस्तःपदांतिकपतितः
यस्याश्चंद्रशिखस्मरभल्लनिभोजयतिसाचंडी २१

भल्लस्यनिभंष्ठमयस्मिन्यस्यसः निभंछद्मसदृक्षयोरित्यभिधानात् एवंचरूपांतरसंपादना
द्गितित्यतिशयोद्योत्यते चंद्रशिखइत्यनेनोद्दीपकचंद्रस्यापिमानानयनोदनकत्वान्मानेबाहु
ल्यमभिव्यज्यते साचंडीजयतिमदनार्धेनाएवादीनामप्यगणनादितिभावः २१ देवइति अर्पि
तचरणस्रजि एवंचसंघाधिमावननालिकस्यापरिचयोद्योत्यते बहुमायेएवंचरूपांतरग्रह

९ णसामर्थ्यं व्यज्यते देवर्षिभोदेवपदेनक्रीडारसिकतयाऽनेकविधदेहधारणनिपुणनिपुणत्वमावे
द्यते कैटभीरूपं दैत्यवंचनायेति भावः वहतिसतीति एवं च प्रात्यक्षिकत्वेनापलापानर्हत्वं द्योत्यते
सुरासुरहसिता कथं सर्वान् पुरुषान् विहायायमीदृशोवृत्तइति भावः अत एव लज्जाकुटिलेक्षणा
किमियं कामिन्येव पुरुषत्वमानमयावृतेति धियेति भावः लक्ष्मीर्जयति सर्वोपहासवत्त्वेपि धैर्या

देवार्पितचरणस्त्राजिबहुमायेयवहति कैटभीरूपं　जयति सुरासुरह
सिता लज्जाजिह्मेक्षणा लक्ष्मीः २२　तान्सुरानपिहरिरपितव
देकपटकैटभीरूपं　यैर्यद्बिंबाधरमधुलुब्धैःपीयूषमपिमुमुचे २३

करणादिति भावः २२ तानिति तान् सकपटत्वेन प्रसिद्धान् असुरानपिसुष्ठुरांतिकं सुरान्त
द्भिन्नान् सर्वदा असमीचीनग्राहकानपि वंदे पीयूषादप्यधिकामेतस्या अधरामृतमिति ता ९
त्विकज्ञानेननसमीचीनवस्तुग्राहकत्वादिति भावः तं कपटस्तन्यत्वेन प्रसिद्धं कपटकैटभीरूपं हरि
मपि वंदे कपटाज्ञानेपि कपटाकरदैत्यवंचनानिपुणकपटरूपधारणादिति भावः यैर्असुरैर्यस्याः

कैटभ्याःलक्ष्म्याःअधरमधुनिलुब्धैःमधुपद्मुनाद्दंजनकृतांव्यनक्ति पीयूषमपि एवंचपरित्या
गानर्हत्वेपितत्करणेनकैटभीरूपचित्राप्रवाणालिंगत्वंध्वन्यते २३ तल्पीति तल्पीकृताहिरुरगंच
सर्पबाधायाअगणनेनरागाल्लिङ्गापोव्यज्यते अगणितगरुडः एवंचसर्वत्रगमनयोग्यत्वेनपक्षि
त्वेनविवेकशून्यतयावान्यत्रतत्कथनयोग्यत्वेप्येतद्गणनयापिसएवद्योत्यते हाराभिहित
विधिःहारस्यनाभिसंबंधादितिभावः आलिंगनांतरायभूतहारस्यत्यागार्हत्वेपितदुपेर्यैवप्रक्षे

तल्पीकृताहिरगणितगरुडोहाराभिहितविधिर्जयति
फणव्रातपीतश्वासोरागांधायाःश्रियःकेलिः २४

येणकेलिज्ञानसंपादनेनलज्जाशून्यत्वेनसएवावेधते यद्वाकृष्णमद्यापिनापसरतीतिक्रोधा
न्निकटवर्तिहाराभिहननेननहारापायभीतिशून्यत्वेनायंचहननंक्रोधात्क्रूरंनयदिष्यतीतिज्ञा
नहीनतयासएवावेधते ज्ञातसंख्याकफणपीतश्वासः एवंचसंख्यायाःपानाचयासंभवतीति
दूषणमपास्तं एवंचमरणभीतिशून्यत्वेनसएवध्वन्यते एवंविधःसागांधायाःश्रियःकेलिःए

१० वंचान्याभिरंगनाभिर्यद्वागटनेक्रियेतेतन्निषिध्यतिभावः ॰जयतिरताद्युन्नामप्रतिबंधकसमूहेषु
त्कर्षेणालित्वादितिभावः अत्रतल्पीकृतांगहरित्यादिनाव्यंजनयागाढालिंगनप्रतिपादनाद्रागा
धायाङ्गस्यस्यनतथाप्रयोजनमित्याभाति २४ स्मेरेति स्मेरंकिंचिद्धास्ययुक्तंसुखाविर्भावादि
तिभावः यत्तु आननंअर्थात्कृष्णस्यास्मेननकृत्वाआकारेदिनास्मेराननरूपज्ञापकज्ञानवताहरि
णाआकलितंअनुमितंस्मेराननेनहरिणास्वस्यापिविशेषणं विपरीतरतकारिण्याश्रयः सस्पृ

स्मेराननेनहरिणासस्पृहमाकारवेदिनाकलितं जय
तिपुरुषायितायाःकमलायाःकैटभीध्यानं २५

हं एवंचस्वस्यापिसुंदरत्वेपितद्विषयस्पृहावत्वेनानिर्वचनीयरूपत्वात्कलितंकैटभ्यांव्यज्यते कै
टभीध्यानं एवंचस्त्रियोपिस्त्रीध्यानेनाद्भुतत्वेकैटभीरूपेणध्यायते जयतित्रिभुवनाभिरामिण्या १०
रमयापिक्रियमाणत्वादितिभावः २५ कृतेति कृतंकांतमनोज्ञंयत्केलिकुतुकं एवंचोत्सा
हविशेषणसुरतसंपादनात्श्वासबाहुल्यंव्यज्यते यत्तुकांतेनविष्णुनासहयत्केलिकुतुकमि

तितन्नअन्येनसहाप्रसक्तेःकांतकेलिरित्यनेनसुरतक्रीडैवायास्पतीत्युपिनजसक्रीडाद्वंसंभ
वातू नाभिसरोजइत्यादिनानवततश्रती तेश्च यथाएलादृत्रीयाःश्रीःतस्यात्रीतःमदनानलसंता
पनिवृत्तेरित्तिभावः ये श्वासास्तेषांसेकेननिद्राणःस्यकस्यद्रवदर्थ्यीयत्वेन श्वासेबाधाद्वारंवार
संबंधोलक्ष्यते तेनचसुखनिद्रायोग्यत्वंव्यज्यते वितताल्लिहतमेव धोरितयस्यनाभिसरो
जेविधिःजगन्निर्माणकर्ताएवंच श्रमयोग्यत्वान्निद्रायोग्यत्वंध्वन्यते जयति सरोजन्मायनशी

कृतकांतकेलिकुतुकश्रीन्तीलश्वाससेकनिद्राणः धो
रितविततालिरुतानाभिसरोजेविधिर्जयति २५

तमंदसुगंधसमीरणनाभिसरोजसुखस्वापयत्नादित्तिभावः २५ एकेति एकंदंतहेमातुरपा
र्वतीगंगारूपमातृद्वयवत्वात् निस्त्रिगुणंएवंचब्रम्हरूपंद्योत्यते चतुर्भुजोपिपंचकरः अपि
विरोधाभासोर्थकःशुंडामादायपंचकरत्वमन्यथाचतुर्भुजत्वं षडमुखनतज्येष्ठत्वादित्तिभा
वः सप्तछदगंधमदोयस्य अष्टतनुर्महादेवःतत्तनयएताद्रशास्त्वं जय सख्यात्क्रममात्रमत्र २६

११ मंगलेति मंगलकलशायुक्तोऽपि विक्रमो येनाकुमारोयस्य तं एवं च विघ्नविनाशनसमर्थत्वं ध्वन्यते ग
जवदनं अंदभेन एवं चंदभेन भजनमनर्थकमित्यावेद्यते यदीयदानोदकार्थं चंचलेः सोरभ्यमा
लिताद्दानोदकस्येति भावः तरलपदेन सकलकुसुमगंधाधिकत्वं दानगंधे व्यज्यते रोलंबेः भ्र
मरैः तिलसाम्यं श्यामत्वादिति भावः एवं च कुचयोर्महत्तरत्वं व्यज्यते जालं विगणपतिविषयकं

एकरदद्वैमातुरनिस्त्रिंशगुणचतुर्भुजापि पंचकर जयषडमु
खनतसप्तछदगंधमदाष्टतनुतनय २७ मंगलकल
शद्वयमयकुंभमदंभेनभजतगजवदनं यद्दानतोयतर
लैस्तिलतुलनालंबिरोलंबैः २८

त्रभावध्वनिः २९

याभिरित्ति याभिः स्त्रीभिः अनंगो मदनः सांगीकृतः स्वयं तत्साहाय्यसंपादनादिति भावः ये ११
नमदनेन ताः स्त्रिय अस्त्रीकृताः स्वविजयसाधनत्वेनेति भावः इति वामस्य सुंदरस्य समी
चीनस्येति यावत् यदाचरणं समीचीनाचरणमित्यर्थः तत्र प्रणवो तत्परो एवं चागर्हितस्य

सांगतासंपादनादेवमेवस्त्रीत्वेननायकाधीनानांस्त्रीणांस्वानुरूपतासंपादनेननायकस्य तदधीनत्वसंपादनादुपकारप्रणयत्वमुभयोर्व्यज्यते अतएवैतादृक्कामिनीकामोप्रणमत एवंचेत्तत्सेवयासमीचीनमेवभविष्यतीतिध्वन्यते यत्तु अंगरहितस्यांगवत्तासंपादनात् स्त्रीणांचस्त्रीभिन्नत्वसंपादनाद्विरुद्धाचरणस्याभाव्यात् कामिनीकामोप्रणमत एवंचेत्तयोः संगतिःसंतानोचितेतिव्यज्यतइति संतानंव्याख्यानंतन्मंगलप्रकरणविरोधात् स्त्रीपुंवा

याभिरनंगःसांगीकृतस्त्रियोस्त्रीकृतास्वतापेन
वाम्याचरणप्रवीणौ प्रणमततौकामिनीकामौ २९

म्याचरणानन्वयाच्च असंजसमिवाभाति यद्वापरस्परमप्येतयोरीदृग्विपरीताचरणप्रवीणत्वेनान्यस्यतत्करणस्याशक्तेरसमानत्वादेतत्सेवैवसमुचितेतिध्वन्यतइत्यर्थः २९ अथकवीन्स्तौति विहितेति शक्रायुधमिवविहिताःघनाःबहवःअलंकाराःउपमानादयोयेनतं पक्षेविहितमेघालंकरणंविचित्रवर्णानांअक्षराणांयाआवलिःतत्प्रचुरंस्फुरणंस्फूर्ति

१२ यस्यतं पक्षेवर्णाः नीलपीतादयः तत्संक्तिविकारस्फुरणं उत्पत्तिर्यस्यतं वक्रवक्रोक्तिकुशलं पक्षेय
थाश्रुतंवल्मीकभुवंवाल्मीकं शक्रधनुषोऽपि ततएवोत्पत्तिरिति लौकिकं कविंकाव्यकर्तारं नौमि रू
पकमत्रालंकारः ३० व्यासेति व्यासवचसांनिर्यासं एवंच तत्त्वार्थवत्त्वंसरसत्वंचव्यज्यते विश्वस्य
जगतःसारं एवंइतोऽस्यन्न पुरुषार्थसाधनमिति ध्वन्यते एतादृशंभारतंवंदे यदंकिताभारतीभा

विहितघनालंकारंविचित्रवर्णावलीमयस्फुरणं। शक्रायुध
मिववक्रंवाल्मिकभुवंकविंनौमि ३० व्यासगिरांनिर्यासं
सारंविश्वस्यभारतंवंदे भूषणतयैवसंज्ञायदंकिताभारती
वहती ३१

भारतचिन्हितांसंज्ञांभूषणतयैवभारतीसरस्वतीवहति एवं
चभारत्याःभूषणत्वंनामप्रसिद्धनामवत्त्वप्रतिपादनेनसर्वग्रंथाधिकत्वमावेद्यते भारतएव १२
कारणस्वाविकव्युदासः अन्योऽप्यप्रसिद्धस्यकस्यचिन्नाम्नाप्रसिद्धोभवतीतिलौकिकं भारतक
र्तृत्वेनव्याससस्तुतिरित्यवधेयं ३१ सतीति काकुत्स्थानांकुलंतदुन्नतत्वात्गिरिणाकुलपदेन सर्वेषा

२

मधुन्नतिसंपादेनेनज्ञातकोटिप्रविस्तरत्वंतेनन्वबहुतरप्रमेयवत्त्वंव्यज्यते बहुरसेप्रभूतभृंगा
रादिरसशालिनि पक्षेबहुजलवति एवंचतापापनोदकत्वंव्यज्यते अतएवैतादृशरामायणे
सति अन्यकाव्येनकिंतेनगतार्थत्वात् इतिभावः अत्रदृष्टांतमाह गंगापूरेवहतिसतिकुल्या
कृत्रिमासरित्किंराहतीतिकाक्वानेत्यर्थः नचित्तपथमवतरतीतिभावः ३२ अतीति अत्यं

सतिकाकुत्स्थकुलोन्नतिकारिणिरामायणेकिमन्येन रोहतिकु
ल्यागंगापूरेकिंबहुरसेवहति ३२ अतिदीर्घजीवदोषात्व्या
सेनयशोपहारितंहत कैर्नोच्येतगुणाढ्यःसएवजन्मांतराप
न्नः ३३

तद्दीर्घजीवित्वदोषोनचिरकालजीवित्वरूपदोषादित्यर्थः अतिचि
रंजीवित्वस्यान्यत्रगुणत्वेप्यत्रदोषत्वमितिभावः दोषपदंपरिहरणीयत्वंव्यंजयति अतएवखे
दोचित्यंएनेदर्वाहसएवव्यासएजन्मांतरमापन्नःगुणाढ्यःबृहत्कथाकर्ताकैर्नोच्येतअपि
तुसर्वैरित्यर्थः एवंगुणाढ्यव्यवहारोव्यासस्यचिरंजीवकत्वमेवप्रतिबंधकंसंवृत्तमितिभावः एवं

१२ चैतादृग्यत्रासिस्पृहानकृताकिंतुचिरंजीवित्वमितिमहन्मूर्खत्वमावेद्यते तेनचव्यासाधिकत्व
गुणाढ्य यद्वासएवतेषवक्ताराढ्यासगुणाढ्यैर्योऽसमावत्वंद्योत्यते ३३ श्रीरिति वाल्मिकिव्यास
गुणाढ्यान्नमस्कुर्मः यैर्वाल्मिक्यादिभिर्भिन्नाविलक्षणरीत्यनुसरणादितिभावः सरसाशृं
गारादिमती पक्षेसउज्वलसरस्वतीवाग्देवतानदीच त्रिस्रोताइवगंगेवस्वर्गमृत्युपातालेषुप्रवा
हत्रयवत्वादितिगंगायाः एवंचवाल्मिक्यादिनांसकलकल्मषविनाशकत्वंद्योत्यते स्फुरति

श्रीरामायणभारतबृहत्कथानांकवीन्नमस्कुर्मः
त्रिस्रोताइवसरसासरस्वतीस्फुरतियैर्भिन्ना ३४

एवंचत्रितयवाचांवास्तवैकरूपत्वमेवेतिव्यज्यते तेनचवाल्मिक्यादित्रितयस्यसमानत्वमावे
द्यते यद्वावाल्मिक्यपेक्षयाकिंचिन्न्यूनत्वंव्यासततोगुणाढ्यइतिध्वन्यते पूर्वत्रश्रीपदंत्रिष्व १२
प्यन्वेत्यत्ररामायणमात्र ३४ साकूतइति साकूतंसाभिप्रायंमधुररसोत्कर्षाधायकरसनिष्ठ
गुणवत्कोमलशब्दगुणशालि एतादृशंयन्न विलासशालिन्याःकंठकूजितंतस्यायंप्रायशब्दःकं

(86)

मेणबाहुल्यंसाहचर्योपरश्चापरः रतलीलाकालिदासोक्तिःशिक्षासमयेपिमुदे एवंचोभयोःसमत्व
मित्तिभावः एवंसर्ववचनस्यापिउपदेशमयबहुदुःखदत्वेनरतलीलाकालिदासोक्त्याःसुखद
दत्वेनसर्ववाग्विलासाधिक्यंध्वन्यते ३९ भवइति भवभूतेःशिवैश्वर्यस्यसंबंधात्भारतीस
रस्वतीभूधरभूःनगेंद्रकन्याभाति एवंचाणिमाद्यैश्वर्यातगेतलांछनमियातरूपप्राकाम्यात्

साकूतमधुरकोमलविलासिनीकंठकूजितप्राये शिक्षासमये
पिमुदे रतलीलाकालिदासोक्तिः ३९ भवभूतेःसंबंधात्भूधर
भूरेवभारतीभाति एतत्कृतकारुण्येकिमन्यथारोदितिग्रावा

भारत्यापिनगेंद्रकन्यारूपत्वं यथाभवभूतेःकवेः एवंचैश्वर्याभेदबाधनेनस्वेच्छानुरूपकार्यका
रित्वंव्यज्यतेसंबंधात्भारतीभूधरभूःपर्वतभूमिः एवंचनान्यथात्वंशंकनीयत्वमित्तिभावः अन्य
था एतत्कृतकरुणासप्रधाने अपिग्रावारोदित्यपिदलतिवज्रस्यहृदयमित्युत्तरचरितीयपद्य
ग्रावाशैलग्रावाणौशैलपाषाणाइत्यमरः किमितिरोदिति यद्वाभवभूतेःसंबंधादित्यस्यभवे

२७

१४ श्वर्याविर्भावादिति भावः भूधरभूः शैलतनया भारती सरस्वतीरूपेण स्थितेति भावः ॥ एवं चेतत्क
वेर्दक्षिणामूर्त्युपासकत्वं व्यज्यते अत एव भवस्य शंभोः भूतिरैश्वर्यं यस्मिन्निति व्युत्पत्तिरपि संगच्छ
ते पक्षे तर्कमाह अन्यथा एतत्कृतकारुण्यमेव एवं चान्यैर्बहुभिः करुणरसप्रधानानि काव्यानि वि
हितानि परंतु न तत्र शैलस्य रोदनमिति भावः ग्रावा किमिति रोदिति एवं चैतत्कारुण्यजामातृसंब
धेन शैलस्यापि रोदनमिति भावः अथवा भवभूतेः शिवैश्वर्यस्य संबंधात् तत्कृपानद्युत्यर्थः भारती
भूधरभूरेव भूधरेति कविनाम भवभूतिरिति तु गिरिजायाः कुतो वंदे भवभूतिस्सिताननाविगतिपद्य
करणोत्तरं पदवीनाम भस्माद्भवत्येतादृशेयं माला एवं च सरस्वतीप्रचारस्तत एवेत्यन्यकविव्य
तिरेको ध्वन्यते अत एव पर्यंतभूमिरेव नन्वेतत्कवेर्भूधरत्वे किंप्रमाणमत आह अन्यथा एतत्क
वेर्भूधरत्वाभावे एतत्कृतकारुण्ये ग्रावा पाषाणः कथं करोति एतत्कृतकारुण्योत्तरकालीनपाषा
णरोदनस्यैतत्संबंधाभावे अन्यथानुपपत्त्या कवेर्भूधरत्वसिद्धिः एवं च जन्यजनकभावसंबंधाद्रो १४
दने युक्ते तेन एवकारोऽवधार्थकइति केचित् ३६ जातेति प्राक्पूर्वं यथा श्रीखंडिनी द्रुपदपुत्री सि
खंडी द्रुपदपुत्ररूपा बभूव तथा वाणी सरस्वती अधिकप्रागल्भ्यप्राप्त्यर्थं बाणः कादंबरीकर्तृरूपा

बभूव पवर्गान्तृतीयंलस्यच उक्त्यालवारयोरभेदादितिभावः एवंचसरस्वतीतोधिकत्वंबाणद्योत्य
ते वस्तुतस्तुवचनयोरैक्यदोषाद्ध्वेव ३७ यस्मिन्ति यंगुरुः प्रभाकरात् एवंचप्रभाकरंतंत्र
निपुणत्वंतातस्यावेद्यते पक्षेबृहस्पतेः अनुपश्चाद्गणयंतियस्य आस्तिनाम्ना पक्षेसूर्यमंडलसा
न्निध्यनादर्शनेधर्मकर्मसंकुचिततातसद्धास्यान्यस्यधर्मकर्मप्रवर्तकस्याभावादितिभावः

जाताग्निशिखंडिनीप्राक्यथाग्निशिखंडीतथावगच्छामि प्रागल्भ्य
मधिकमाप्तुंबाणीबाणोबभूवेति ३७ यंगुणत्यगतिगुरोरस्तु
यस्यास्तेधर्मकर्मसंकुचितं कविमहमुद्गानसंमिवर्तनालं
नीलांबरंवंदे ३८

पक्षेमलमासइवचक्रुकास्तापिकेषांचित्कर्मणांनिषधा
दितिभावः यद्वातस्यतातस्यधर्मकर्मएवंवाधर्मणोभावोव्यज्यते संकुचितंसम्यक्कौपृथि
व्यांचिंतव्याप्त आस्ते एवंचकर्मठत्वेनसर्वत्रतामप्रसिद्धिरितिभावः यद्वायस्याधर्मकर्मविष
येसंकुचितंसंकोचः भीतिरितियावत् आस्तेकविकाव्यकर्तारंपक्षेतन्नामानंउद्धानसंभिव

२७

शुक्लमिवतेनसिंदूलातेनीलांबराभिधंचंदेनीलांबराभिधंसंकर्षणाभिधं आत्मनामगुरोर्नाम
इत्यादिनिषेधात्प्रकारांतरेणाभिधानंचंदे ३८ सकलेति प्रबंधस्यचतुःषष्टिकलाःकुमुद
बंधोश्चंद्रस्यचषोडशकलाःकल्पयितुंवक्तुंकर्तुंवा पक्षेदर्शयितुंविनाशेनकुलतिलकभूपतिः
सेतुकर्ताप्रवरसेननामाराजापौर्णमासीप्रदोषश्चएकःप्रभुःसमर्थःनान्यइत्यर्थः ३९ काव्य

सकलकलाःकल्पयितुंप्रभुःप्रबंधस्यकुमुदबंधोश्च सेनकु
लतिलकभूपतिरेकोराकाप्रदोषश्च ३९ काव्यस्याक्षरमै
त्रीभाजोनचकर्कशाःनचग्राम्याः शब्दाअपिपुरुषाअपिसा
धवएवार्थबोधाय ४०

स्येति अक्षराणांवर्णानांमैत्रीएकवर्गपठितत्वादि
रूपाएकस्यानेकत्वसंगिएकप्रयत्नकत्वरूपांवाभजन्तितस्यएवंचबंधविशेषशालित्वंव्य
ज्यते पुरुषपक्षेविशेषणमप्यक्षरमैत्रीभाजयन्तिकाव्यस्ययोजनाविशेषवछब्दार्थोभयस्य
अर्थबोधायकर्कशाःश्रुतिकटवःतेषांरसापकर्षकत्वादितिभावःपक्षेक्रूरमतयःएवंचपरा

त्तिखंडनमात्रनिपुणत्वमज्यतेनचग्राम्याः अविदग्धप्रयुक्ताः एवंचचारुत्वाभावोव्यज्यतेनच
पक्षेग्राममात्रवासिनः एवंचकाव्यवासनावासितांतःकरणत्वाभावोध्वन्यते शब्दा अपिपुरु
षा अपिकिंतुसाधवएवव्याकरणसिद्धाएव असाधुत्वज्ञानस्यार्थबोधप्रतिबंधकत्वात् पक्षे
निर्मलमतयएव एवंचार्थप्रतिबिंबभवनयोग्यत्वंद्योत्यते पद्धकाव्यार्थज्ञावासनाशालिनइ
त्यर्थः एवंसर्वेषांकाव्यबोधनानर्हत्वमितिभावः ४० वंशादृति वंशोवेणौघुणइवकीटइवर

वंशेघुणइवनविशंतिदोषारसभावितसतांमनसि
रसमपिलुनप्रतीच्छतिबहुदोषःसन्निपातीव ४१

सभावितश्रृंगारादिभावनावति पक्षेजालातिशायसंबंधवति ओषधीइवलेपवतीतिकश्चि
तसतांमरसगृहीतानांसहृदयानांवामनसि मनसीत्येकवचनेनसमीचीनमनस्त्वमेकत्वम्
नशालित्वंध्वन्यते दोषानविशंति एवंसुतरामवस्थितत्वभावोद्योत्यतेबहुदोषोदोषकद्दक
पक्षेनीलमस्थिसंधिरुजइत्यादिबहुपद्रवान् सन्निपातीवयुगपत्प्रकुपितवातपित्तादि

37

२६ मान्रसमपिशृंगारादिकमपि एवंचावन्नेयस्थायोग्यत्वंव्यज्यते पक्षेमृगांकादिकमपि एवंच
कावार्तांकाथादेरितिभावः नप्रतीछतिनगृण्हातीतिकिंवक्तव्यमितिभावः ४१ विगुणो
पीति विगुणोपियेकाव्यगुणास्तदन्यतमन्यून्योपिकाव्यबंधः अत्रबंधपदमधिकमाभाति यद्वा
बंधोरचनामात्रंसाधुनं एवंचगुणवत्तासंपादनकर्तृत्वंध्वन्यते सुखसंपादकोभवतिसुवंशैः
सरलवेणुभिः अनूद्यमानः एवंचानुवादसंपादनेपिसुजनदुर्जनयोरंतरंभवतीतिभावः फू

विगुणोपिकाव्यबंधः साधूनामाननंगतः स्वदते
फूत्कारोपिसुवंशैरनूद्यमानः श्रुतिंहरति ४२

त्कारोपि एवंचसुखाजनकत्वंध्वन्यते श्रुतिंहरतिश्रवणसुखसंपादकोभवति ४२ स्वयमपि
स्वयंभूरिछिद्रोपिबहुवाच्योपि एवंचस्वदोषेषुदर्शनयोग्यत्वेपितद्दर्शनाभावेनभ्रांतित्व
मावेद्यते पक्षेबहुरंध्रोपिसर्वतोमुखंसकलजनसमक्षं पक्षेसर्वदिग्विषयंचापलंमौखर्यं एवं
चजनभीतिन्यूनत्वंध्वन्यते पक्षेचापल्यंतन्वन् विस्तारयन् एवंचविरसभावोध्वन्यतेतिल

उःतितउःचालनीस्त्रियामित्यभिधानंपिशुनःपरोत्कर्षासहिष्णुःविवेचननिर्णये पक्षेस्वीकार
अधिकृतःदत्ताधिकारःएवंचगुणादिकंविहायदोषमात्रांगीकर्तृत्वंदुष्टानामितिभावः ४२
अंतरिति अभ्यंतरंगूढंस्थितान्पक्षेनिलीनान् अर्थान्प्रतिपाद्यविषयान् पक्षेपदार्थान्
अव्यंजयतःव्यंजनाविषयानकुर्वतःपक्षेअप्रकाशयतः अतएवप्रसादेनकाव्यगुणेनापक्षेनि

स्वयमपिभूरिछिद्रश्चापलमपिसर्वतोमुखंतन्वन् तितउस्तुष
स्यपिशुनोदोषस्यविवेचनेऽधिकृतः ४३ अंतर्गूढानर्थानव्यंज
यतःप्रसादरहितस्य संदर्भस्यनदस्यचनरसःप्रीत्यैरसज्ञानां ४४

र्मलतयारहितस्यसंदर्भस्यकाव्यस्यनदस्यचपुंस्त्वनिर्देशेननिर्मलत्वस्यावश्यापेक्षणीय
त्वमावेद्यते यद्वातद्वत्वेनविरलतयातत्तुल्यप्रतिपादनात्काव्येपिविरलत्वमावेद्यते तदुक्तं
छिद्राएवकवयःछिद्राण्येवकाव्यानीति रसःशृंगारादिःपक्षेजलंरसज्ञानां एवंचान्येषांप्री
त्याजनकत्वेपिनकाचित्क्षतिरितिभावःप्रीत्यैन ४४ यदिति असतांसहृदयभिन्नानांपक्षे

१८ पापवतामसेवनीयंअमृततुल्यं पक्षेअमृतबहुलंसुवर्णानांशोभनाक्षराणांविन्यासोग्रथनंयत्र। वर्णस्तुवाक्षरेइत्यमरः पक्षेसुवर्णस्यहेम्नः विन्यासःरचनादियत्रशोभनरसार्थोभयप्रचुरा पक्षेदेवसमूहबहुलंकाव्यंत्रिविष्टपंस्वर्गवासमिवविद्मः एवंचात्रनमनोरथाभावआशंकनीयइतिभावः एवंचयथास्वर्गार्थंयत्नःसद्भिःक्रियतेतथाकाव्यार्थंविधेयइतिव्यज्यते ४५ सदिति सत्कवेः

पदसेवनीयमसतामसृतप्रायंतुसुवर्णविन्यासं सुरसार्थमयंका
व्यंत्रिविष्टपंवासमिवविद्मः ४५ सत्कविरसनाशूर्पीनिस्तुषतरश
ब्दशालिपाकेन तृप्तोदयिताधरमपिनाद्रियतेकासुधादासी ४६

एवंचासत्कवेर्निरासः रसनैवशूर्पीअल्पंशूर्पंशूर्पीप्रस्फोटनंशूर्पमस्त्रीत्यमरः यथास्वल्पशूर्पेणनिस्तुषताजायतेनतथामहाशूर्पेणेतिस्त्रीसंप्रदायः तथानिस्तुषतरःनिर्दोषःशब्दरूपोयःशालिःतस्यपाकेनपरिणामेननिर्दोषकाव्यास्वादनेनेत्यर्थः तृप्तोदयितायाः एवंचातिस्पृहणीयत्वमधरेध्वन्यते अधरमपिउत्कृष्टतांनाद्रियतेकासुधादासी एवंचमाध्वीकादेःकुत्रगणना १८

(37)

तिभावः एवंचसुधातोधरतोपिसत्काव्येऽधिकत्वंव्यज्यते एवंचस्वर्गार्थफलंविहायकाव्यार्थमे
वास्वादयइतिध्वन्यते अत्रचत्वारीरंतावदिष्टार्थव्यवच्छिन्नापदावलीतिदंडिमतेतनार्थविशिष्टश
ब्दस्यैवकाव्यत्वमितिप्रदीपकृन्मतेनचशब्दमात्रोपादानं ४६ अकलितेति नकलिताश
ब्दस्यालंकृतिर्यया अनुप्रासादादिशब्दालंकृतिशून्येत्यर्थः एवंचअर्थालंकारादिसत्वंव्यज्य
ते पक्षे अकलितःशब्दोयया एतादृशीअलंकृतिभूषणंयस्या सशब्दभूषणवत्वेनन्यस्पन्ना

अकलितशब्दालंकृतिरनुकूलास्खलितपदनिवेशापि
अभिसारिकेव रमयति सूक्तिःसोत्कर्षशृंगारा ४७

नंभविष्यतीतिधियेतिभावः अनुकूलाद्भुतरसप्रत्यायिका पक्षेनायकचित्तानुकूल्यवती
सास्खलितःबंधदार्ढ्येनशून्यःकोमलइतियावत् पदानांसुप्तिङंतानामन्वयवतांनिवेशोग्रथनं
यस्याःसा एवंचगौडीरीतियुक्तेतिध्वन्यते पक्षेस्खलनंस्थानादन्यत्रपतनं एवंचसंकेतगमन
सस्खरत्वमावेद्यते पदनिवेशः चरणविन्यासः यद्वा अनुकूलानिस्फुटमर्थप्रतीतिजनकानि अ
स्खलितानिव्याकरणनिष्पन्नानि एवंचनेपार्थासाधुत्वशून्यत्वंद्योत्यते यानिपदानितत्संनि

१८ वेशनीयपक्षे अनुकूलानि कुंतसंकेतप्रापकानि स्खलितहीनानि यानि पदानि तद्विन्यासव
तीअपिरमास्याद्यां एवं च गुणादोषाभावयोः संपादनेनात्यंतमाग्रह इति भावः सोत्कर्षशृंगारा
दुत्कृष्टशालिशृंगाररसवती अन्येअसमस्यायं ममेतिरसपरिपोषवती अभिसारिकेव अभिस
रणे अभिसारणान्यतरवतीवत् उक्तं च कामार्ताभिसरेत्कांतं सारयेद्वाभिसारिकेति एवं च प्रमा
तिशाय्योव्यज्यते सूक्तिः काव्यपक्षे शोभनोक्तिमती रमयती एवं च काव्ये शब्दालंकृद्दोषाभावसत्व
संपादनमप्रयोजनमपि तत्कृतसंपादनेनैवोशृंगारचितमिति व्यज्यते यद्वा शब्दालंकृतिवत्या
सदोषपदविन्यासानपि सोत्कर्षशृंगारा सूक्तिः रमयति शब्दस्य प्राधान्यात् तदलंकाररसस्या
वश्यकत्वेपि तदभावे दोषरहितस्यावश्यकत्वेपि केवलोत्कृष्टशृंगाररसत्वेनैव चमत्कारातिप्रयो
जनकत्वं काव्यस्येतीति भावः एवं च शृंगारादिरसवत्वे काव्ये वश्यमापेक्षितमिति व्यज्यते अतए
व नीरसो हि निबंधो यः सोपशब्दो महाकवेः स तेनाकविरेव स्यादन्यनास्मृतलक्षणमिति ध्वनि १८
कृता रसस्य प्राधान्यमभिधायि एवं च सर्वरसप्रधानीभूतशृंगाररसवत्वस्य समस्तेतोत्कृष्टमिति सास्या
र्थाः ५७ अध्वनीति अध्वनिर्व्यंग्यार्थशून्यं यत्तु ध्वनिरुत्तमं काव्यं तद्भिन्नमित्यर्थः इति तन्न गुणी

(36)

भूतव्यंग्यादेहृद्यत्वाल्हादजनकत्वात् पक्षेशिंजितशून्यंपदग्रहपर अनुप्रासमात्रार्थंपदग्रहःपर
मुत्कृष्टापत्र पक्षेअत्यंतचरणसंलग्नंकाव्यं अभिज्ञसभायांहृद्यपाद्यानंजनकत्वेपिनकिंचित्करत्व
मितिभावः हृदयंवानमदयति श्रवणंवानमदयति एवंचश्रोतुरुभयान्यतरदपिआनंदेनवि
षयांतरस्फूर्तिशून्यंनकरोतीतिभावः अत्रहृदयंश्रवणंवानमदयतीत्येतावतैवसिद्धे द्वितीय
नवेत्यस्यनतथाप्रयोजनमाभाति श्रवणेश्रोतुःहृदयंवक्तुःनमदयती अपरिलोषाद्विदुषान

अध्वनिपदग्रहग्रहपरमदयतिहृदयंनवानवाश्रवणं
काव्यमभिज्ञसभायांमंजीरंकेलिवेलायां ४८

साधुमन्येप्रयोगविज्ञानमित्याद्युक्तेरितिव्याख्यानेवाकारद्वयंनञोमानर्थक्यमाभाति मं
जीरंक्रीडाकालेनमदयतीतिनाविर्भावयंतंकरोतीत्यर्थः काव्यंहृदयंनमदयति मंजीरंश्रव
णंनमदयतीतिव्याख्यायांवाकारद्वयमनर्थकमाभाति अत्रेदमवधेयं व्यंग्यार्थशून्यंकाव्य
मेवनास्तिनचाव्यंग्यत्ववरंस्मृतमित्युक्त्याव्यंग्यात्यंताभाववत्त्यापिकाव्यत्वमस्तीतिवाच्यं
तदुदाहरणेस्वच्छेत्यादिपद्येमंदाकिनीविषयकरत्याख्यभावादिव्यंग्यस्यसत्त्वात् किंबहु

१९ नासकोप्यविषयोनास्तियत्रव्यंग्यंनभासेत समयादेर्विशेषस्यात्वभावेहेतुतानता अतएवप्रधा
नगुणभावाभ्यांव्यंग्यस्येवंव्यवस्थितेः उभेकाव्येतदन्यद्यच्चित्रमित्यभिधीयते इतिध्वनिकृ
ताप्यधायि यद्वाकाव्यंकाव्यत्वाभिमतं ४८ आस्वादितेति आस्वादितः नतुपीतः एवं
चाधरपानस्यताधरपानेयाकीदृक्माधुर्यमुपलभ्यतइतिनविद्मइतिभावः दयिताधररूपसु
धारसोयेनतस्यैव एवंचनान्यस्येतिभावः यद्वामधुराएवेतियोज्यं एवंचामधुराणांव्यवच्छे

आस्वादितदयिताधरसुधारसस्यैवसूक्तयोमधुराः
अकलितरसालमुकुलानकोकिलःकलमुदंचयति ४९

दः यद्वा आस्वादितोदयिताधरसुधारसोयेनतस्यैव एवंचनृदेहेनदयिताधरपानंविधायप
श्चाद्देवरूपेणामृतंनिपीयेतदुभयाधिकतररसवत्काव्यंछयाकविर्भवतीतिभावः एवंचदयि
ताधरास्वादादेहेतुत्वप्रतिपादनादवाप्तकार्यस्यकारणेऽनादरवत्काव्यास्वादतः सकलविष
यास्वादभूतमौलिदयिताधरस्वादादावप्यनादरइतिद्योत्यते एवंचकाव्यास्वादब्रह्मरसरूप
ताद्योत्यतेसूक्तयःकाव्यानिमधुराः एवंचदयिताधरसुधारसेपारधिकतरत्वस्यकाव्यसामा १९

३५

न्येभिधानेनतद्विशेषात्तमकाव्येऽस्यतानिश्चायस्ततोध्वन्यते अत्रदृष्टांतमाह अनास्वादितत्व
तमुकुलः मुकुलपदेनरससंभृतत्वंव्यज्यते कोकिलःकलंमधुरंनवदति यद्वास्त्रकृपः उत्तमका
व्यानि ४९ बालेतिलोकव्यवहारज्ञानस्यकाव्यहेतुत्वमित्याह बालायान्कटाक्षेणसूत्रि
तंसूचितमित्यर्थः एवंचलज्ज्ञात्वेनप्राकट्यसंपादनायोग्य अत्रबालापदेनाल्पवयस्काभिधी
यते नस्वीयाभेदरूपा असतीत्याद्यर्थविरोधात् सव्या असतीत्वेपिनायिकायाःस्वीयात्वाक्ष

बालाकटाक्षसूत्रितमसतीनेत्रत्रिभागकृतभाष्यं
कविमाणवकाद्दूतीव्याख्यातमधीयतेभावं ५०

तिमित्यपिकश्चित् असत्याःनेत्रत्रिभागेनबहुलनेत्रव्यापारेणकृतभाष्यंकृतकिंचित्प्राकट्यं
दूतीव्याख्यातंदूत्यावचनवृत्त्याभिहितंभावं अभिप्रायंकविमाणवकाःकवयोमाणवकाइ
व एवंचाज्ञाततत्त्वंयोस्यते अभियते एवंचातितीक्ष्णमतिभिःसूत्रेणततोल्पमतिभिर्व्याख्या
नेनयथावबुध्यतेग्रंथादितथातीक्ष्णमतिभिःकैश्चित्कविभिःस्वल्पव्यवहारज्ञानेन ततोल्प
मतिभिः अधिकतरतज्ज्ञानेनकाव्यंक्रियतेइतिनव्यवहारज्ञानंकुत्रापिव्यभिचरतीतिध्व

39

न्यते यद्वान्यप्रमेयप्रहरणत्रीलान्कवीन्निंदन्ति दूतीव्याख्यातमित्यनेनेतस्मात्पदादयमर्थो
बोध्यइतिनियमसहायशक्तिविषयमितिव्यज्यते शक्तेरतिस्थूलमतिविषयत्वात् अस
तीनित्रविभागकृतमाध्यमित्यनेनजघन्यलक्षणवृत्तिविषयत्वमितिद्योत्यते लक्षणावृत्तेः
किंचित्स्थूलमतिविषयत्वात् बालाकटाक्षसूत्रितमित्यनेनव्यंजनावृत्तिविषयत्वमितिव्य
ज्यते व्यंजनावृत्तेरतिसूक्ष्ममतिविषयत्वात् बालाकटाक्षसूत्रितमित्यनेनव्यंजनवृत्तिविषय
मितिव्यज्यते व्यंजनावृत्तेःरतिसूक्ष्ममतिविषयत्वात् भावमर्थं अर्थादन्यकविनिबद्धंये अपी
यतेस्वकाव्ये विषयीकुर्वंतिनतेकवयः किंतुतेषुतेबालकामूर्खाइत्यर्थः एवंचपरकाव्यस्पृष्ट
वाच्यलक्ष्यव्यंग्यार्थस्पर्शित्वंस्वकाव्यस्यध्वन्यते यद्वा बालाकटाक्षसूचनाद्व्यापारप्रकटा
र्थस्यकविमाणवकाव्यवियत्वंकवीनांत्वस्यंतनिगूढार्थोपिकाव्यविषयइतिस्वग्रंथेपिनिगूढार्थ
विषयत्वंध्वन्यते अर्वाचीनकवयः सर्वेबालकाइव एवंबालाकटाक्षसूचितमित्यादिनानायिका
यास्वेच्छ्याप्रकटीकृतभावस्याभिज्ञत्वंकवीनांनतुलदंतगताभिप्रायज्ञानवत्वमितिनायिकाधि
क्यवर्णनेनतद्विषयशृंगारवर्णनेसर्वरसवर्णनापेक्षयाकठिनतरमितिव्यज्यते तद्वत्स्वग्रंथा

धिक्यंच अतएवशृंगारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धनस्पर्धकोऽपिनविपुलइत्यभाणिज
यदेवेन ९० स्वकीर्त्यनुवृत्तयेस्वनामदर्शयन्नेवैतरार्याविलक्षण्यंस्वार्यास्वाह मसृणेति म
सृणानांस्निग्धानांकोमलानामितियावत् पदानांविभक्त्यंतानांरीतिःवैदर्भ्यादिःतस्याःगतिः
प्राप्तिःयासुतास्तथेत्यर्थःयद्वारीतिगौडी पक्षेकोमलचरणविन्यासशालिगतयःमंथरगत
यइत्यर्थःसज्जनहृदयंसमाधिगम्यार्याइतिभावःएवंचदुर्हृदयानामत्रानधिकारइतिध्वन्य

मसृणपदरीतिगतयःसज्जनहृदयाभिसारिकाःसुरसाः
मदनाद्वैतोपनिषदोविशदागोवर्धनस्यार्याः ५१

तेपक्षेसज्जनस्यचतुरतरस्यहृदयमभिसारयंतिस्वाधीनताभाजनंकुर्वंतितताःसुष्ठुरसःशृं
गारादिर्यासुताःपक्षेआसक्तिविशेषवत्यःमदनाद्वैतोपनिषदःउपनिषदइत्यनेनमदनाद्वैत
कृतातिशयप्रशालित्वमावेद्यते पक्षेसन्निधिमदनसत्वात्त्यातस्मिन्नाशाकारित्वंध्वन्यते विशदाः
प्रसादरूपगुणवत्यःपक्षेउज्वलवेषाःआर्याछंदोनामपक्षेश्रेष्ठाःगोवर्धनस्यगोवर्धनेतिकविना

वाणीति वीणीप्राकृतकाव्यसम्यगुचितःरसोयस्याः एतादृशेपयबलेन बलात्कारेण पक्षेबलक्रमेण एवकारेणैवचवान्यति निम्नानुगामीस्वभावजला कालिंदीगगनतलमिव एवंचप्राकृतकाव्येसुरसतासंपादनेसुगमतरेसंस्कृतकाव्येतत्कठिन त तरमितिद्योत्यते तेन चस्वयंतत्संपादनेनस्वस्मिन्नाधिक्यमावेद्यते यद्वावाण्याःस्वभाव एवायंतत्प्राकृतकाव्येसुरसतामाप्नोतीति प्राकृतकाव्येकरणादरएवसमुचितस्तथापिसंस्कृतकाव्यएयादरोमयाविहितस्तत्रकदाचिद्यदिकदाचित्तथाविध

वाणीप्राकृतसमुचितरसाबलेनैवसंस्कृतंनीता।
निम्नानुरूपनीराकलिंदकन्येवगगनतलम् ५२

सुरसताभावोभविष्यतिसचतत्रभवद्भिर्भवद्भिःक्षंतव्यइतिध्वन्यते अथवाप्राकृतकाव्यसमुचितरसावाणीप्राकृतसमुचितरसेव प्राकृतानांसाधारणजनानांसमुचितरसेव प्राकृतानांसाधारणजनानांसमुचितःसुखावहइत्यर्थःरसोयस्याःअतःबलेनप्राकृतसत्र्यत्यादितिरस्कारेण संस्कृतंनीता। यद्वाप्राकृतेसाधारणजनेसम्यगुचितःअत्यंतइत्यर्थःरसःप्रीतिर्यस्याः एतादृश्यपिबलात्कारेणसंस्कृतेसाधुरूपंप्रापिता। एवंचजीवाभिलाषिण्याःसहृत्ततासंपादनेपुरुषार्थइ

तिभावः निम्नानुरूपनीराकलिंदपर्यंतकन्येव एवंचविवेकवत्त्वंध्वन्यते तेनचनीचानुगामीरसशालितायायोग्यत्वंध्वन्यते गगनमत्युच्चदेशंनीता एवंचप्राकृतसंस्कृतयोर्भूतलगगनवत्तुल्यतासंपादनेनप्राकृतात्संस्कृतेऽसंताधिक्यमावेद्यते ५२ आर्येति इयंआर्याणांसप्तशतीएषांप्रगल्भमनसांयैःप्रगल्भमनोभिरित्यर्थः एवंचप्रगल्भ्यमनोभिरादरेणनादरएवनकिंचित्फलमितिभावः दूतीरहिताइवतेनकामिनीमनसिनिविंशंते एवंचदूतोसन्नकिंचिच्चातुर्यंजनकामि

आर्यासप्तशतीयंप्रगल्भमनसामनाहृतायेषां
दूतीरहिताइवतेनकामिनीमनसिनिविंशंते ५२

तिव्यज्यते ५३ रतरीतीति रतरीतोवीतंवदनंयस्याः रसाभिर्भावादिनिभावः एवंचालंकारशून्यादकविवार्तेत्तिभावः प्रियेव रुदन्ना अपि अप्रासोपमाद्यलंकाररहिताप्पिवाणीसंतोषायअत्रहेतुमाह सरसा शृंगारादिमती पक्षेशृंगारवती रसवृत्त्या अलंकृतियुतापि पक्षेकटककंउलयुतापिवालभंजीयमतिमेवनमेचेत एवंचरसस्यप्राणरूपत्वंध्वन्यते इदंचनिरलंकारस्या

२२ पिकाव्यत्वमितिमिश्ररुचिनाथमेतेन अतएवताभ्यांमुनिर्जयति योगींद्रोमहात्माकुंभसंभवःये
नैकचुलकेदृष्टौदिव्यौमत्स्यकच्छपाविति निरलंकारोदाहरणमभ्यधायि वस्तुतस्तुएतदुभयोदा
हरणपद्येपिसर्वालंकारमौलिमणिरूपातिशयोक्तेर्विद्यमानत्वात् किंचोक्तिवैचित्र्यस्यालंकार
विरहेकाव्यत्वस्यासंभवात् अतएवकाव्यत्वस्यासंभवात् अतएवकाव्यग्राह्यमलंकारादितिका
व्यव्यवहारप्रयोजकत्वेनस्याभ्यधायिवामनेनापितस्माद्रसवतीकाव्यस्फुटालंकारसहितेऽपिन

रतिरीतिविगतवसनाप्रियमुखदृष्टापिवाङ्मुदेसरसा
अलसालंकृतिरपिनरोचतेशालभंजीव ५४

नचमत्कारहानिरितिसरसत्वस्याधिक्यप्रतिपादनमात्रेतात्पर्यमस्य अत्रचाकलितेत्यादिपद्यो
तात्र शृंगारोत्कर्षमात्रस्यप्राधान्यमर्थः अत्रतुरसमात्रस्यतदितिभेदः ॥ ५४ ॥ इति श्रीम[illegible] २२
परिसर्वालंकृतनृपपुरुषसभामध्यच्छन्नायविराजमानपंडितश्रीतिमाजीपंडितांगजानंतपंडितकृतगोवर्द्ध
नसप्तशतीव्यंग्यार्थदीपनग्रंथारंभाचनव्रज्याव्याख्यानसमाप्तिमगमत् ॥ ७ ॥ [illegible] ॥

(46)

॥श्रीगणेश॥ अवधीति कश्चिद्यौवनभराक्रांतांप्रपापालिकां अवलोक्य तांप्रत्याह प्रपाजलदा
नस्थानेन तद्रक्षणकर्त्री एवंचधार्मिकत्वंव्यज्यते तेनचपथिकजनजायानहंतव्याइत्युपदेशादा
नयोग्यत्वंजीवनरक्षणकआजीवनविनाशकर्तृमनुचितमितियाच्यते प्रसीद एवंचबला
त्कारानर्हत्वंध्वन्यते किंप्रसन्नतायाःफलमित्यतआह स्तनौपिधेहि मार्गांतरेणानेनैवमार्गे
णझटितिक्कुतोनगम्यतइत्यत्रहेतुगर्भस्तनविशेषणमाह दुर्लंघ्यौचतौवर्त्मशैलौच एवंच

॥श्रीगणेश॥ अवधिदिनावधिजीवाःप्रसीदजीवंतुपथि
कजनजायाः दुर्लंघ्यवर्त्मशैलौस्तनौपिधेहिप्रपापालि ५६

मार्गांतराभावाद्दुर्लंघयितुमशक्यत्वाच्चैतत्पिधानमावश्यकमितिध्वन्यते किंपिधानफलमाह
अवधिदिवसावधिजीवोजीवनंयासांताःपथिकजनजायाःजीवंतु एवंचत्वत्कुचकनकमही
धरदर्शनलुब्धैः पथिकैरत्रैवकालातिवाहनेकृते अवधिदिनातिक्रमेतत्कामिनीजनस्यमरण
मेवभविष्यतीतिभावः एवंचातिशयितयौवनशालित्वंव्यज्यते ५६ कृतपरिणयांतरेणनायक
मसूयमानांनायिकांकाचिदुपदिशति अतीति गृहिणीप्रथमस्त्रीसपत्नीस्तनप्रादुर्भावोसपरि

15

२३ एवंचकिंचिद्विलंबेकोवेदकिंकरिष्यतीतिभीतिशालित्वंध्वन्यते अतिस्नेहवतीसमीचीनस्वभावासे
वानिपुणानायकमनोगतकारिणीनम्राचजाता एवंचपूर्वसपत्नीसंपादनदुःखवत्तयान्यूनत्वेन
सपत्नीतर्जनादिनादुःशीलतामियमेवसेवांकरिष्यतीसेवामोढ्यं अतएवमनःप्रातिकूल्यंकिं
करिष्यत्ययमतःपरंममेत्यवनीतातामकरोत्सपत्नीतारुण्योत्तमसमयेमेवायमस्यामस्यतासक्तः
स्यादितिभियाअतिवात्सल्याद्यकरोदितिभावः एवंचतयाप्यग्रेएवमेवविधेयमतोधुनास्म्यादिक

अतिवत्सलासुसीलासेवाचतुरामनोनुकूलाच अजनि
विनीतागृहिणीसपदिसपत्नीक्षणोद्वेगे ५६

रएमनर्थकमितिद्योत्यते
यद्वानायिकाछलेनाालिनंकंचनकश्चिद्विवाहांतरकरणमयमुपदिशति एवंचसपत्न्यांजातायामि
वमवश्यमत्संतानुकूल्यमाचरिष्यतीतिध्वन्यते काचित्कस्याश्चित्कृतवक्रोक्तिरूपः ५७ कश्चि २३
तद्व्योन्मादयमानांनिजकुलविद्वेषिणींअन्योक्त्यावक्ति अर्थात् अयिकूलनिचुलःक्षीरवृक्षःय
द्वानिचुलोंबुजहिज्जनवृक्षसमरःवृक्षविशेषः एवंचतस्योक्तिपालनमुचितमित्यावेद्यते तस्ययन्मूला

56

छेदनं एवं चासत्त्वं ध्वन्यते तत्र दुःशीलास्तत्कारिण्यः याः लहर्यः ताभिः कुत्सितबहुभाषिणि कावेरि बकस्य न तु हंसादेः विघ्नभोजनविघ्नोपायः पंकः क्षुद्रमत्स्यादेर्बकभुक्तत्वादिति भावः स एव सारो यस्याः न चिरात् शीघ्रमेव भवितासि एवं च परोपकारकारकस्य स्वकुलप्रभवस्य यस्योन्मादवत्त्वा न्ममन्तुः स्वं ददासि तत्र दुष्टभोजनशेषं द्रव्यं शीघ्रमेवागमिष्यतीति ध्वन्यते ५७ काचिन्नायिका

अयि कुलनिचुलमूलोच्छेदनदुःशीलवीचिवाचाले बकविघ्न
सपंकसारा न चिरात्कावेरि भवितासि ५७ अपि विविधवच
नरचनो ददासि चंद्रं करे समानीय व्यसनदिवसेषु दूतिकपुन
स्तद्दर्शनीयासि ५८

परपुरुषसंगमाय प्रलोभनकारिणीं दूतीं प्रत्याह अपीति हे दूति एवं च स्वकार्यमात्रसंपादकत्वं न त्वदन्यदीयाभिमानकार्यविचारकारित्वमिति द्योत्यते नानाप्रकारशालि वचनरचनेऽपि एवं च प्रलोभनकारि त्वं वचनानि पुराणकारित्वं विश्वासानर्हत्वं उत्तरप्रत्युत्तरकरणानर्हत्वं च ध्वन्यते चंद्रं समानीय करे ददासि करतलगोचरं करोषि असंभविन

२४ मय्यर्थे जातप्रायं कृत्वा प्रदर्शयसीतिभावः व्यसनमपकीर्त्यादि तत्काले त्वं कुत्र दर्शनीयासि एवंच त्वयाघटनामात्रं कर्तुं शक्यं न त्वपकीर्त्यादिनिवारणमितिभावः यद्वा भाविवियोगभीता नायिका संघट्टनमात्रकारिणीं दूतीं प्रत्याह विविधवचनरचनेत्यनेन दुःप्रापोपि नायकस्त्वया समानेतुं शक्य इति द्योत्यते चंद्रमित्यनेनाल्हादजनकतयाऽवश्यस्पृहणीयत्वमावेद्यते व्यसनं वियोगः दुःखदत्वादिति भावः त्वं कुत्र दर्शनीयासि एवंचायं यथा वियोगो न भविष्यति तथा यदि त्वया कर्तुं शक्यं तर्हि

अस्तु म्लानिर्लोकोलांछनमपदिश्यतां हीयतामोजः तदपि
नमुंचति सत्वां वसुधाच्छायामिव सुधांशुः ५९

त्वदुदीरितं संपादयामीति द्योत्यते ५८ अपकीर्त्यादिनाद्यपरित्यागं संभावयंतीं नायिकां दूती समाधत्ते अस्त्विति म्लानिः निस्तेजस्कत्वं अस्तु जनः लांछनं अपवादं पक्षे कलंकं च ददतु ओजः यद्वा शास्त्रैर्विभाग्ये पक्षे प्रसादचिन्होपः हीयतां तदपि स नायकः सुधांशुः भूच्छायामिव एवंच सागानर्हत्वं ध्वन्यते पक्षे सुधांशुतुल्यः एवंच स्पृहणीयत्वमावेद्यते त्वां न मुंचतीत्यक्षरति यद्वा पूर्वोत्तरमेवतत् ५९ मामियं दु २७

र्वचनैर्दुःखयतीतिवाच्यंननायकंप्रतिनायिकासखीतवैवायमपराधोनतस्याइतिवक्ति अतीति अं
तर्निविशात्हृदयमध्येप्रविशात् तयारक्षांतरेधृतोपीत्यर्थः यद्वाप्रथमतःसाधुत्वंप्रदर्श्यहृदयंप्रवि
श्यैतादृशाचरणंकरोषीत्यसंततानुचितकारित्वंतवेत्यर्थः पक्षेअंतःमध्ये अतिचापल्यंअन्यनायि
कासंभोगादिरूपं पक्षेनिरंतरसंयोगविभागरूपंविस्तारयन् एवंचज्ञानक्षमानर्हत्वंद्योत्यते निका
मसंततकाठिन्यंकठिणत्वंयस्यसः एवंचचापल्यसंपादनेपिनम्रत्वंनकरोषीतिदुःखदस्त्वमसी

अतिचापल्यंवितन्वन्नंतर्निविशन्निकामकाठिन्यः
मुखरयसिस्वयमेनांसवृत्तांशंकुरिवघंटां ६०

तिद्योत्यते पक्षेकाठि
न्यमवयवसंनिवेशविशेषः यद्वा अंतःसदनमध्ये एवंचबहिःस्थितोचापल्यंकरोषिसदनमध्ये
तुकार्कश्यमित्युभयतोपिदुःखदस्त्वमितिद्योत्यते स्वयंत्वमेवसवृत्तांसच्चरितां एवंचतयास
च्चरितंविलोक्यावश्यमेतस्यादुःखंभवतीतिभावः पक्षेसमीचीनवर्तुलांहोरकीलोघंटामिव
एनांमुखरयसि एवंचत्वैवायमपराधोनतस्याइतिभावः ६० कयोश्चिद्यूनोःसंकेतनिकेतना

२९ भायादेवनसंगइतिकाचित्कश्चिद्दूतिः अंगेष्विति खंजनयूनोःपरमुत्कृष्टमनोभवस्य एवंचसर्वत्रबा
धाकारित्वंध्वन्यते प्रसरः आधिक्यं अंगेषुजीर्यते समाप्तं भवति यद्वापरंकेवलंजीर्यतेतित्योजना।
परंतु अंतर्गर्भितः विधिर्यत्र एतादृशोधरामंडले केलिर्निनिधिमत्प्रदेश एवखंजनयोरसंभागइ
तिप्रसिद्धिः यद्वासखीअत्यंतगुप्तसंकेतविनीनैवंकार्यंकार्यमितिनायिकामुपदिशति खंजनयूनोः
इत्यादिनीर्यज्ञातिमतया विवेकशून्यत्वेऽपिप्रचुरतरमन्मथविकारत्वेऽप्यत्यंतगुप्तस्थलप्राप्तिंवि

अंगेषुजीर्यतिपरंखंजनयूनोर्मनोभवप्रसरः नपुनरनं
तर्गर्भितनिधिनिधरामंडलेकेलिः ६१

नायंखंजनयोरपिनरतिस्तत्रकिंतु
वाच्यंभवादृशाःसमीचीनपरीक्षितसंकेतस्थलंविनारतिर्नोचितेतिध्वन्यते यद्वामन्मथविकारत
यासद्यःसंभोगमपेक्षमाणंनायकंनायिकावक्तीत्यपिप्रतिभाति ६१ कश्चित्कंचिदुपदिशति अं २९
धत्वमिति अंधसमये क्रीडाकाले अवलोकनानर्हत्वादितिभावः अंधभावंबधिरकालेक्रीडाकाली
नक्रीडाकरणकाव्यकालेयथार्थःपदैःपिशुनेप्यच्चरहस्यमस्त्यित्यादिनासुतारतारंभकालेन्नीलपदाभि

५०

धानस्यकामशास्त्रेभिधानात् बधिरभावंआलंब्यप्रजानांपतिःएवंचमहद्भिरप्यनादरणीयस्यास्मीय
तेनतत्रकावार्तान्यस्येत्तिभावः श्रीकेशवयोः एवंचैतादृशसान्निधिःस्नेहस्यकुत्रापद्गतिध्वन्यते प्रण
यीप्रीतिमान् नाभिर्मध्यस्तत्रवसतिमान् केशवनाभिवसतिमत्वात् श्रीकेशवयोःसुरतसमयेपित्र
म्हणावध्यचर्तित्वमितिभावः यद्वानाभोसविधेवास्तव्यंयस्य एवंचातिनैकट्यंध्वन्यते अथवा
नाभिवसतिमान् उभयोः प्रणयीजातइत्यर्थः यद्वोभयोर्नित्यर्थः यद्वोभयोर्नित्यसान्निध्यात्प्रणय

जंघत्वंमधसमेयवधिरकालआलंब्य श्रीकेशवयोः
प्रणयीप्रजापतिर्नाभिवास्तव्यः ६२

ताउभयसान्निध्यंएतेननाभिर
वयवविशेषइत्यर्थेकेशवसंबंधयत्वेपिश्रीसंबंधाभावइत्यपास्तं एवंचनिकटवसतिमात्रंनपुरु
षार्थःकिंतुप्रीतिविशिष्टनिकटवसतिरिभावः एवंचप्रभ्वादिसविधेप्रभ्वादिप्रीतिविशिष्टनिक
टवसतिकामस्यमासितर्त्येनयेयवशात्तिष्ठेतिध्वन्यते ६२ मूर्खसविधकृतपांडित्यमनवाप्त
तत्फलतयाखिलंकश्चिदन्यात्स्यासमाधत्ते अयीतिकोशकारःकीटविशेषःवनेचराणांएवं

२६ र्यौकार्यविधुरत्वंध्वन्यते पुरःगुणानांतंतन्नामुद्गिरणंकुरुषेयत्तचितंआर्यएवंचपश्चात्प्रतीकारान
र्हत्वंव्यज्यते विचारितंउदरंयस्यसःकृतएतागुणानिःसारंतीतिविचारयतीतिभावःत्वंनअस्मिखलु
सतेल्लाभःएवंचमूर्खाणामेपगुणप्रकटनंनकेवलमप्रातिकरमपित्वनर्थकरमितिध्वन्यते ६३
दूलीनाम्यिकाप्रेमार्गितिन्नायंनायकेनगतिः अगणितेति अगणितःमहिमाकुलप्रतिष्ठायेनमहिमाप

अयिकोऽन्याकारकुरुषेवनेचराणांपुरोगुणोद्गारं यत्नविदार्यवि
चारितजठरस्त्वंसरकलुतेल्लाभः ६३ अगणितमहिमालं
घितगुरुरधनेहस्तनंधयाविरोधी दृष्टाकीर्तिस्तस्यास्त्वयि
रागःप्राणनिरपेक्ष्यः ६४ देनावज्ञयस्पृहणीयत्वंव्यज्यते लंघितःगुरुःश्वसुरा

दिर्येनतन्निषेधतिरस्कारादित्तिभावःनविद्यतेधनेछायस्यस्तनंधयोऽस्यतबालःएवंचातिस्नेहा २६
र्हत्वंध्वन्यते तद्विरोधीप्रसयोत्तस्माचिरात्संभोगस्तन्महानिर्भवतीतिलोकिकंदृष्टाइछाविषई
भूताअपकीर्तिर्यस्यएवंचाकीर्तिभीतिन्नत्यत्वंध्वन्यते तस्यास्त्वयिरागःप्राणापेक्षाशून्यःएवंचा

त्रायत्राग्लित्वंव्यज्यते ६४ कृतापराधंसमाधानायारब्धकटकपटंनायकंनायिकावक्ति अप
राधादन्यांगनासंगरूपात्तवैयान्वेषणार्थमेवतत्रगतमित्यादिकपटरूपवचनरचनामांअधिकं
व्यथयति एवंचसत्यभाषितेऽपराधोपि क्षंतुमर्हइत्यावेद्यते महतोपराधस्यनात्यंतदुःखदत्वं
स्वल्पायाः कपटवचनरचनायाः कथमत्यंतदुःखदत्वमित्यत्रदृष्टांतमाह शस्त्राघातः आघात
पदेनासत्यत्वंव्यज्यते नतथाव्यथयति यथासूच्याव्यधः सीवनंतुदुःखं एवंचसूचीकृतत्वेनाल्प

अपराधादधिकंमांव्यथयतितवपटुवचनरचनेयं
शस्त्राघातोनतथासूचीव्यधवेदनायादृक् ६५

त्वमासंख्यमितिभावः यद्वासाधारण्येनोक्तिरियं ६५ कयाश्चिद्रूष्टतारसतीतिपृष्टादाक्षिकेन
कंदर्पापरेणज्ञानंसर्वमिदमथेत्युदीरितनकिंत्वयाज्ञातुंशक्यमित्यपरस्तंप्रत्याह असतीति अ
सत्यालोचयतितल्लोचनं एवंचइतस्ततःप्रेरणग्लानित्वंध्वन्यते तद्रूपमुकुरपदेनमंगलत्वेनावक्र
ग्राह्यदर्शनयोग्यत्वंव्यज्यते किमप्यनिर्वचनीयंमनोवर्ति असत्याएयतिभावः यद्वाकिमपिनस्व

53

२८ यतीतियोजना मनोवर्तीत्यनेनातिसूक्ष्मत्वं तथाबहिःस्फुटीभावानर्हत्वं द्योत्यते यत्प्रतिफलतितन्
तु सारस्वतमपिचक्षुः सरस्वतीयत्वेनातीतानागतवस्तुप्रग्रहणयोग्यत्वं ध्वन्यते सतिमिरमिवति
मिराख्यदोषदूषितमिवनलक्षयतिसप्रकारकंनवेत्तीतिकिंवाच्यमितिभावः एवंचसारस्वतच
क्षुषोप्येतादृग्गतिस्तत्रकावार्तातातवेतिभावः एवंचासतीलोचनप्रतिफलितमपिनज्ञातुंशक्यंन
वक्तुंवार्तातावच्चित्तगतामितिध्वन्यते यद्वाकेवलंपंडितंकटाक्षयंतीमसतीं आलोच्यतंप्रतिकाचिद

असतीलोचनमुकुरे किमपिप्रतिफलतियन्मनोवृत्ति
सारस्वतमपिचक्षुः सतिमिरमिवतन्नलक्षयति ६६

न्यावक्ति सारस्वतंज्ञानरूपंचक्षुः तन्नलक्षयत्यपि एवंचयाथातथ्येनस्वरूपपरिच्छित्तिर्दुरापा
स्तीतिभावः एवंचकटाक्षितमपित्वयानज्ञायतइत्यंतजडत्वेनसर्वमपित्वदीयाध्ययनमसत्कल्प २०
मितिध्वन्यते ६६ नायिकादुर्वादकुपितांनायिकांसखीसमाधत्ते अन्येति अन्यस्याप्रियस्य
मुखेयोदुर्वादः दुर्वचनंप्रियत्वप्रदायिनस्यमुखेसएवदुर्वादएवसएवेत्यनेनान्यूनानतिरिक्तत्वं

ध्वन्यते परिहासःसनिंदकंरंजकवाक्यं अत्रदृष्टांतमाह अगहभिन्नंधनजन्मायोधूमःसरूपांतरा
नापन्नः अगुरुसमुद्भवःधूमःएवंचायंनदोषस्तेनचदति किंतुकुतुकेननात्तःकोपोविधेयस्त्व
येतिध्वन्यते यद्वासाधारणोक्तिरियं अत्रैवचविपरीतयोजनया अप्रियवदनविनिसृतवचनंस
मीचीनमप्यसमीचीनमेवेतिव्यज्यते एवंचप्रेमगामुख्यत्वमाचष्टेतकथमेतेदीयेताहृद्रावच

अन्यमुखेदुर्वादोयःप्रियवदनेसएवपरिहासः इतरेंधनज
न्मायोधूमःसोगुरुसमुद्भवोधूपः ६७ अपिसुभगकुतु
कनरत्ता विचरंतीसौरभानुसारेण त्वयिमोहायवराकी
पतितामधुपीवविषकुसुमे ६८

नमाकर्ण्यतूष्णींस्थीयेतत्वयेतिवा
दिनीसखीनायिकासमाधत्तइतिवार्थः ६७ दुष्टस्वभावेनायकेनायिकासखीवक्ति अ
पीति सुष्ठुभाग्यंयस्यतत्संबुद्धिः कथमन्यथैताहृशीनायिकात्वय्यासक्तेतिभावः कुतुका
र्थेनत्वन्यलाभार्थमितिभावः रत्तला यद्वा सुभगस्यकुतुकेननरत्ता सौरभंसुगंधिगुणवा

55

२८ निनिकीर्तिःतदनुसारेणविचरंती एवंचतत्त्वभावस्यनतात्त्विकज्ञानंतस्याइतिभावः यद्वासौर
भानुसारेणस्वकीर्तिरक्षणातुरःसरंविचरंती पक्षेसौगंध्यानुसारेणविषकुसुमेकुसुमपदेनाव
श्यफलजननयोग्यत्वंध्वन्यते मधुपीव एवंचज्ञानशून्यत्वंध्वन्यते त्वयिवराकी एवंचसर
लत्वंध्वन्यते मोहायदुःखाय एवंचनान्यफलाभावोद्योत्यते पक्षेवैचित्र्यायपतिता एवंचदे
ववशादेनादृशंकार्यं तथाकृतंत्वंचेतादृशाचरणशालीतिदुःखातिशयोध्वन्यते ६८ कस्या

अपिमुग्धगंधसिंधुरशंकामात्रेणदंतिनोदलिताः
उपभुंजतेकरेणूः केवलमिहमत्कुणाःकरिणः ६९

श्चित्सविधंकस्यचित्तरुणमहाजनस्यागमनसंभावनयाऽन्यतरुणगमनविरततावधृति
जरद्भिःसायुज्यतइतिकश्चित्कंचित्प्रत्याह अपीति अपिमुग्धःसुंदरोयोगंधगजःयद्गंध २९
मात्रादेवगजाःपलायंतेसगंधगजःतच्छंकामात्रेणनतुदर्शनादिनेतिभावः दंतयुक्तागजाः
दलिताःभग्नाःपलायिताइत्यर्थः मत्कुणाःदंतरहिताःकरिणःकेवलंकरेणूःहस्तिन्यःउपभुंजते

बहिःकृत्रिमातिशायितलज्जावत्त्वेप्यंतर्दुष्टत्वमिति कांचित्प्रतिवक्ति । अतीति अत्यंत
विनयेन वामनतनुर्यस्याः एवं च त्रिविक्रमावतारकर्मकरणसामर्थ्यमभिव्यज्यते वधूः गेह
देहलीं न विलंघते एवं च लज्जातिशायः सूच्यते अस्याः पुनरारभटीं प्रौढिमाविशेषं कुसु
मवाटीं विजानाति तत्रैव तस्या निर्लज्जत्वं दुष्टत्वमिति भावः एवं च सदने एव विनयप्रदर्शनं
गुर्वादिवंचनेन कुसुमवाट्यामेकेन परपुरुषेण उपभुंक्त इति ध्वन्यते सद्मनि केवलमेतस्याल

अतिविनयवामनतनुर्विलंघते गेहदेहलीं न वधूः
अस्याः पुनरारभटीं कुसुमवाटीं विजानाति ७०

ज्जावत्त्वदर्शनमात्रेण भवद्भिः विश्वसितव्यमिति ध्वन्यते ७० पररंजकगुणानामेव गुण
त्वं न स्वरंजकानामित्याह अंतरिति यत्र येषु द्वित्रा अपि साक्षिणो विरलाः एवं च बहुसाक्षि
संतमावास्त्वमिति भावः तैः अंतर्गतैः रंजनासमर्थैः गुणैः किं न किंचित्फलमिति भावः गीतैः
सगुणः एवं च गुणे गुणानंगीकारेऽपि पररंजकतया गीतैरपि गुण एवतावद्व्यवहार इति भावः य

२९ दसोवनेचरंचनंग्रामसंवाभावेन मधुराद्यरसानभिज्ञत्वंध्वन्यते हरिणमपि एवंचमनुष्याणां कावार्तेतिभावः हरतिस्वाधीनताभोजनंकरोति यद्वावनेचरमपि एवंचनागरिकस्यकावार्तेतिभावः अथवाप्रकटीकृतगुणानामेवसार्थक्यंनत्वंतर्गतानामितिभावः यद्वाद्वितीयनायकांतरसंयोजनान्नायिकांवक्ति किं अंतर्गतानेककामकलाभिस्त्वदीयाभिरितिभावः यत्रेषु गुणेषुद्वित्रा अपि एवंचबहूनांकावार्तेतिभावः साक्षिणोविरलाःगीतिरियंगीतिरत्नमतिवे

